REVISED AND REPRINTED CHAPTERS
FOR RUCHIRA (FOR CLASSES VIIth) by NCERT.
संशोधित एवं परिवर्द्धित संस्करण
जनवरी 2018 (द्वारा य०शि०अ०और प्र०परिषद)

VIIth

## मङ्गलम्

यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः

एवा मे प्राण मा बिभेः॥1॥

यथाहश्च रात्री च न बिभीतो न रिष्यतः

एवा मे प्राण मा बिभेः॥2॥

यथा सूर्यश्च चन्द्रश्च न बिभीतो न रिष्यतः

एवा मे प्राण मा बिभेः॥3॥

यथा सत्यं चानृतं च न बिभीतो न रिष्यतः

एवा मे प्राण मा बिभेः॥4॥

**भावार्थ**

जैसे आकाश और पृथ्वी दोनों न डरते हैं और न दुःख देते हैं,

वैसे ही मेरे प्राण! तू मत डर! ॥1॥

जैसे दिन और रात न दुःख देते हैं और न डरते हैं,

वैसे ही मेरे प्राण! तू मत डर! ॥2॥

जैसे सूर्य और चन्द्र न दुःख देते हैं और न डरते हैं,

वैसे ही मेरे प्राण! तू मत डर! ॥3॥

जैसे सत्य और असत्य न दुःख देते हैं और न डरते हैं,

वैसे ही मेरे प्राण! तू मत डर! ॥4॥

नवमः पाठः

# अहमपि विद्यालयं गमिष्यामि



मालिनी - (प्रतिवेशिनीं प्रति) गिरिजे! मम पुत्रः मातुलगृहं प्रति प्रस्थितः काचिद् अन्यां कामपि महिला कार्यार्थं जानासि तर्हि प्रेषय।

गिरिजा - आम् सखि! अद्य प्रातः एव मम सहायिका स्वसुतायाः कृते कर्मार्थं पृच्छति स्म। श्वः प्रातः एव तया सह वार्ता करिष्यामि।

(अग्रिमदिने प्रातः काले षट्वादने एव मालिन्याः गृहघण्टिका आगन्तारं कमपि सूचयति मालिनी द्वारमुदघाटयति पश्यति यत् गिरिजायाः सेविकया दर्शनया सह एका अष्टवर्षदेशीय, बालिका तिष्ठति)



दर्शना - महोदये! भवती कार्यार्थं गिरिजामहोदयां पृच्छति स्म कृपया मम सुतायै अवसरं प्रदाय अनुगृह्णातु भवती।

मालिनी - परमेषा तु अल्पवयस्का प्रतीयते। किं कार्यं करिष्यत्येषा? अयं तु अस्याः अध्ययनस्य क्रीडनस्य च कालः।

दर्शना - एषा एकस्य गृहस्य संपूर्ण कार्यं करोति स्म। सः परिवारः अधुना विदेशं प्रति प्रस्थितः। कार्याभावे अहमेतस्यै कार्यमेवान्वेषयामि स्म येन भवत्सदृशानां कार्यं प्रचलेत् अस्मद्सदृशानां गृहसञ्चालनाय च धनस्य व्यवस्था भवेत्।



मालिनी - परमेतत्तु सर्वथाऽनुचितम्। किं न जानासि यत् शिक्षा तु सर्वेषां बालकानां सर्वासां बालिकानां च मौलिकः अधिकारः।

दर्शना - महोदये! अस्मद् सदृशानां तु मौलिकाः अधिकाराः केवलं स्वोदरपूर्त्तिरेवास्ति। एतस्य व्यवस्थायै एव अहं सर्वस्मिन् दिने पञ्च-षड्गृहाणां कार्यं करोमि। मम रुग्णः पतिः तु किञ्चिदपि कार्यं न करोति। अतः अहं मम पुत्री च मिलित्वा परिवारस्य भरण-पोषणं कुर्वः। अस्मिन् महार्घताकाले मूलभूतावश्यकतानां कृते एव धनं पर्याप्त न भवति तर्हि कथं विद्यालयशुल्कं, गणवेषं पुस्तकान्यादीनि क्रेतुं धनमानेष्यामि।



मालिनी – अहो! अज्ञानं भवत्याः। किं न जानासि यत् नवोत्तर-द्वि-सहस्र (2009) तमे वर्षे सर्वकारेण सर्वेषां बालकानां, सर्वासां बालानां कृते शिक्षायाः मौलिकाधिकारस्य घोषणा कृता । यदनुसारं षड्वर्षेभ्यः आरभ्य चतुर्दशवर्षपर्यन्तं सर्वे बालाः समीपस्थं सर्वकारीयं विद्यालयं प्राप्य न केवलं निःशुल्कं शिक्षामेव प्राप्स्यन्ति अपितु निःशुल्कं गणवेषं पुस्तकानि, पुस्तकस्यूतम्, पादत्राणम्, माध्याह्नभोजनम्, छात्रवृत्तिम् इत्यादिकं सर्वमेव प्राप्स्यन्ति।

दर्शना – अप्येवम् (आश्चर्येण मालिनी पश्यति)

मालिनी – आम्। वस्तुतः एवमेव।

दर्शना – (कृतार्थतां प्रकटयन्ती) अनुगृहीताऽस्मि महोदये! एतद् बोधनाय। अहम् अद्यैवास्याः प्रवेशं समीपस्थे विद्यालये कारयिष्यामि।

दर्शनायाः – पुत्री- (उल्लासेन सह) अहं विद्यालयं गमिष्यामि! अहमपि पठिष्यामि! (इत्युक्त्वा करतलवादनसहितं नृत्यति मालिनीं प्रति च कृतज्ञतां ज्ञापयति)

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **प्रतिवेशिनी** | – | पड़ोसन | neighbour |
| **प्रेषय** | – | भिजवा दो | send |
| **श्वः** | – | आने वाला कल | tomorrow |
| **गृहघण्टिका** | – | घण्टी | bell |
| **अष्टवर्षदेशीया** | – | लगभग आठ साल की | approximately eight years old |
| **क्षमा** | – | समर्थ | able to do |